योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १०२

द्व्यधिकशततमः सर्गः १०२

श्रीराम उवाच ।

परिज्ञाते परे वस्तुन्यनादिनिधनात्मनि ।

संपद्यते वद ब्रह्मन्कीदृशः पुरुषोत्तमः ।। १

श्रीवसिष्ठ उवाच ।

श्रृणु संपद्यते कीदृग्ज्ञातज्ञेयो नरोत्तमः ।

यावज्जीवं कथं चैष किमाचारोऽवतिष्ठते ।। २

उपला अपि मित्राणि बन्धवो वनपादपाः ।

वनमध्ये स्थितस्यापि स्वजना मृगपोतकाः ।। ३

आकीर्णं शून्यमेवास्य विपदश्चातिसंपदः ।

स्थितस्यापि महाराज्ये व्यसनान्येव सूत्सवाः ।। ४

असमाधिः समाधानं दुःखमेव महत्सुखम् ।

व्यवहारोऽपि सन्मौनं कर्माण्येवात्यकर्मता ।। ५

जाग्रदेव सुषुप्तस्थो जीवन्नेव मृतोपमः ।

करोति सर्वमाचारं न करोति च किंचन ।। ६

रसिकोऽत्यन्तविरसो निर्घृणो बन्धुवत्सलः ।

निर्दयोऽत्यन्तकरुणो वितृष्णस्तृष्णयान्वितः ।। ७

सर्वाभिनन्दिताचारः सर्वाचारबहिष्कृतः ।

वीतशोकभयायासः सशोक इव लक्ष्यते ।। ८

तस्मान्नोद्विजते लोको लोकान्नोद्विजते तु सः ।
परमुद्वेगमापन्नः संसृतौ रसिकोऽपि सन् ।। ९
नाभिनन्दति संप्राप्तं नाप्राप्तमभिवाञ्छति ।
आस्तेऽनुभूयमानेऽर्थे न च हर्षविषादयोः ।। १०
दुःखिते दुःखितकथः सुखिते सुखसंकथः ।
आस्ते सर्वास्ववस्थासु हृदयेनापराजितः ।। ११
कर्मणः सुकृतादन्यदस्मै किंचिन्न रोचते ।
स्वभाव एव महतां ननु यन्न विचेष्टितम् ।। १२
नालम्बते रसिकतां न च नीरसतां क्वचित् ।
नार्थेषु विचरत्यर्थी वीतरागः सरागवत् ।। १३
यथा शास्त्रव्यवहृतेः सुखदुःखैः क्रमागतैः ।
अनागतोऽपि चायाति न हर्षं न विषादिताम् ।। १४
संप्रहृष्टाश्च लक्ष्यन्ते लक्ष्यन्ते दुःखितास्तथा ।
न स्वभावं त्यजन्त्यन्तः संसारारभटीनटाः ।। १५
आत्मीयेष्वर्थजातेषु मिथ्यात्मसु सुतादिषु ।
बुद्बुदेष्विव तोयानां न स्नेहस्तत्त्वदर्शिनाम् ।। १६
अस्नेह एव सुघनस्नेहार्द्रहृदयो यथा ।
वत्सलां दर्शयन्वृत्तिं ज्ञस्तिष्ठति यथाक्रमम् ।। १७
वायूनिव प्रवाहस्थाः स्पृशन्ति विषयान्मुधा ।
देहसत्ताविषान्मूढा लीयन्ते विषयोदरे ।। १८
बहिः सर्वसमाचारमन्तः सर्वार्थशीतलम् ।
नित्यमन्तरनाविष्ट आविष्ट इव तिष्ठति ।। १९
श्रीराम उवाच ।
स्वरूपमीदृशं तस्य को वेत्ति मुनिनायक ।
वद सत्यमसत्यं वा भवत्यज्ञो ह्यपीदृशः ।। २०
अश्ववद्ब्रह्मचर्येण चरन्तोऽचारुचेतसः ।

मिथ्यातपस्विदार्ढ्याय भवन्त्येवंविधा मुने ।। २१

श्रीवसिष्ठ उवाच ।

असत्यं वास्तु सत्यं वा स्वरूपं वरमीदृशम् ।

विद्धि वेदविदां त्वेष स्वभावानुभवस्थितः ।। २२

अनाविष्टा विचेष्टन्ते वीतरागाः सरागवत् ।

गतहासा हसन्त्यज्ञान्सहसा करुणाकुलाः ।। २३

चित्तादर्शगतं दृश्यं सर्वं कपटकुट्टिमम् ।

पश्यन्त्यसत्परिज्ञातं स्वप्ने हेमेव हस्तगम् ।। २४

अन्तःशीतलतामेषां तां न जानन्ति केचन ।

दूराच्चन्दनदारूणामामोदमिव जन्तवः ।। २५

ये तु विज्ञातविज्ञेयास्तादृशाः पावनाशयाः ।

जानन्ति तांस्तथैवान्तरहेः पादानिवाहयः ।। २६

भावं निगूहयन्त्येते तमुत्तममनुत्तमाः ।

ग्राम्यैर्धनैः किलानर्घ्यं कश्चिन्तामणिरापणे ।। २७

तस्मिन्निगूहने भावो यतस्तेषां न दर्शने ।

निर्वासना गतद्वैता गतमानाः किलाङ्ग ते ।। २८

एकान्तामानदौर्गत्यजनावज्ञप्तयस्तु तान् ।

सुखयन्ति यथा राम न तथैव महर्द्धयः ।। २९

स्वसंवेदनसंवेद्यसारा विदितवेद्यता ।

नैषा दर्शयितुं शक्या दृश्यते न च तद्विदा ।। ३०

गुणं ममेमं जानातु जनः पूजां करोतु मे ।

इत्यहंकारिणामीहा न तु तन्मुक्तचेतसाम् ।। ३१

क्रियाफलानि चिद्व्योमगमनादीनि राघव ।

अज्ञानामपि सिध्यन्ति मन्त्रौषधिवशादिह ।। ३२

यो यादृक् क्लेशमाधातुं समर्थस्तादृगेव सः ।

अवश्यं फलमाप्नोति प्रबुद्धोऽस्त्वज्ञ एव वा ।। ३३

आमोदश्चन्दनस्येव स्पन्दनस्य फलं हृदि ।

सर्वस्यैवास्ति तन्नूनं तद्वता समवाप्यते ।। ३४

अहंतावासनाद्वैतं वस्तुता दृश्यवस्तुषु ।

यस्यास्त्यसौ साधयति खगमादिक्रियाफलम् ।। ३५

इदं न किंचिद्भ्रान्तिर्वा खं चेति ज्ञस्तु वेत्ति यः ।

सोऽवासनः कर्मवात्याः कथं साधयति क्रियाः ।। ३६

नैव तस्य कृतेनार्थो नाऽकृतेनेह कश्चन ।

न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।। ३७

न तदस्ति पृथिव्यां वा दिवि देवेषु वा क्वचित् ।

यदुदारमनोवृत्तेर्लोभाय विदितात्मनः ।। ३८

जगदेव तृणं यस्य न किंचिद्रज एव वा ।

किं नाम तस्य भवतु अन्यदादेयतां गतम् ।। ३९

निर्वाहितजगद्यात्रः परिपूर्णमना मुनिः ।

यथास्थितमसावास्ते संप्रयाति यथागतम् ।। ४०

नित्यान्तःशीतलो मौनी सत्त्वीभूतमनोवनिः ।

परिपूर्णार्णवाकारो गम्भीरप्रकटाशयः ।। ४१

रसायनपरापूर्णहृदवत् ह्लादमात्मनि ।

धत्ते करोति वान्यस्य सकलेन्दुरिवामलः ।। ४२

मन्दारमञ्जरीकुञ्जपिञ्जरा देवभूमयः ।

न तथा ह्लादयन्त्येता यथा पण्डितबुद्धयः ।। ४३

चन्द्रबिम्बैर्वसन्तैश्च महतामहताशयैः ।

सारं सौभाग्यसौगन्ध्यसौरभालोकभोगिषु ।। ४४

भ्रान्तिमात्रमिदं विश्वमिन्द्रजालमसन्मयम् ।

त्यजतीति विनिश्चित्य दिनानुदिनमेषणाः ।। ४५

शीतातपादिदुःखानि निजदेहगतान्यपि ।

अन्यदेहगतानीव ज्ञः पश्यत्यवहेलया ।। ४६

करुणोदारया वृत्त्या वृत्त्या व्रततिधीरया ।

नीरसो नीरसारां तु सारतां सरति स्थितिम् ।। ४७

व्यवहारं यथाप्राप्तं लोकसामान्यमाचरन् ।

चराचराणां भूतानामुपर्येवावतिष्ठते ।। ४८

प्रज्ञाप्रासादमारूढस्त्वशोच्यः शोचते जनान् ।

भूमिष्ठानिव शैलस्थः सर्वान्प्रज्ञोऽनुपश्यति ।। ४९

चिरं कल्लोलवलितः सुमना जलधौ भ्रमे ।

परं पारमुपागत्य परां विश्रान्तिमेति सः ।। ५०

हसन्स शान्तया वृत्त्या प्राक्तनीर्जागतीर्गतीः ।

स्मयमान इवास्तेऽन्तर्जनताश्च घनभ्रमाः ।। ५१

एताः कान्तारनिर्मग्नमिताः संसारदृष्टयः ।

असत्यो हृतवत्यो मामित्यन्तर्याति विस्मयम् ।। ५२

दृष्ट्याष्टगुणमैश्वर्यमनिष्टं मे तृणायते ।

इत्युपैत्युपशान्तत्वात्स्मयमानोऽपि न स्मयम् ।। ५३

कश्चिद्गिरिगुहागेहः कश्चित्पुण्याश्रमाश्रयः ।

कश्चिद्गृहस्थाश्रमवान्कश्चिद्बहुरटन्स्थितः ।। ५४

कश्चिद्भिक्षाचराचारः कश्चिदेकान्ततापसः ।

कश्चिन्मौनव्रतधरः कश्चिद्ध्यानपरायणः ।। ५५

कश्चिद्विपश्चिद्विख्यातः कश्चिच्छ्रोता श्रुतेः स्मृतेः ।

कश्चिद्राजा द्विजः कश्चित्कश्चिदज्ञ इव स्थितः ।। ५६

गुटिकाञ्जनखङ्गादिसिद्धः कश्चिन्नभोगतः ।

कश्चिच्छिल्पकलाजीवी कश्चित्पामररूपभृत् ।। ५७

कश्चित्त्यक्तसमाचारः कश्चिच्छ्रोत्रियनायकः ।

कश्चिदुन्मत्तचरितः प्रव्रज्यां कश्चिदाश्रितः ।। ५८

पुरुषो न शरीरादि न च चित्तादि किंचन ।

पुरुषश्चेतनं नाम न स नश्यति कर्हिचित् ।। ५९

अच्छेद्योऽसावदाह्योऽसावक्लेद्योऽशोष्य एव च ।

नित्यः सर्वगतः स्थाणुरचलोऽसौ सनातनः ।। ६०

इति सम्यक्प्रबुद्धो यः स यथा यत्र तिष्ठति ।

तथा तिष्ठतु तत्रात्र स्थानास्थानियमेन किम् ।। ६१

पातालमाविशतु यातु नभो विलङ्घ्य

दिङ्मण्डलं भ्रमतु पेषणमेव येन ।

चिन्मात्रमेतदजरं न तु यातु नाश-

माकाशकोश इवशान्तमजं शिवं तत् ।। ६२

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे उ० मरणाद्यभावोपदेशो नाम द्व्युत्तरशततमः सर्गः ।। १०२ ।।